॥ श्रीः ॥

॥ श्रीगुरुभ्यो नमः ॥

सत्यनाथविरचितं

गुरुद्रोहिखण्डनम्

प्रकाशनम्

सच्छास्त्रप्रकाशनसंस्था

चामराजपेट, बेङ्गळूरु

॥ श्रीः ॥

॥ श्रीवेदव्यासाय नमः ॥

सत्यनाथविरचितं

गुरुद्रोहिखण्डनम्

ये ख्याता गुरवो लोके विद्याधीशादयोऽमलाः ।
तेषामनुग्रहायैव तद्द्रोही दूष्यतेऽधुना ॥

श्रीमन्यायाः वाक्यार्थचन्द्रिकारूपविशिष्टकर्मणि श्रीमद्विद्याधीशतीर्थस्वामिन एव अधिकारिणो नान्य इति सर्वानुभवसिद्धम् । तामेव चन्द्रिकां शेषवाक्यार्थचन्द्रिकात्वेन समापयिष्यामीति मन्यमानस्तद्द्रोही । अत्मनः तत्साम्याभिमानित्वात् । अयमेव हि श्रेष्ठापराधः यत् स्वस्य तत्साम्यमन्तृत्वम् । तदीयोत्कर्षापलायित्वात् । तस्मात् श्रेष्ठकृतस्य ग्रन्थस्य शेषो नाधमेन पूरणीयः ।

अत्र कथां कथयति । विद्यानगरे वीरनरसिंहो नाम राजा आसीत् । तत्सभायां रघुवर्यस्वामिनस्तथा सुरेन्द्रस्वामिनो लक्ष्मीपतिस्वामिनो मायिनश्च उपविष्टा अभूवन् । तदा राजसन्निधौ मध्वाचार्याणां निन्दां चक्रुः । तथाहि— वायोरवतारत्वात् मध्वाचार्याः निर्विघ्नपुरुषा इति माध्वाः । तदसत् । तस्य निर्विघ्नपुरुषत्वे तदारब्ध-ऋग्भाष्यासमाप्तिरनुपपन्ना स्यात् । न च विघ्नाभावे प्रारब्धापरिसमाप्तौ कारणमस्तीति । तदाकर्ण्य सर्वेऽपि वैष्णवाश्चिन्ताक्रान्ता बभूवुः । तदैव रघुवर्यस्वामिन ऊचुः— भवन्त्येव ते निर्विघ्नपुरुषाः । समाप्तं च ऋग्भाष्यम् । देशान्तरे तत्पुस्तकमस्ति । मासद्वयानन्तरं आनीय दर्शयिष्याम इति । तथेत्युक्ताः मठमाजग्मुः । अनन्तरं ऋग्भाष्यस्य शेषं पूरितवन्तः । मासद्वयानन्तरं तत्पुस्तकं सभायां निदधुः । तदवलोक्य सम्यक् वाक्यार्थविचारं कृत्वा भवन्त्येव मध्वाचार्याः निर्विघ्नपुरुषाः इत्यङ्गीचक्रुः । वीरनरसिंहभूपालोऽपि सन्मानं चक्रे । अथ मठमागत्य तत्पुस्तकं छित्वा जले निक्षिप्तवन्तः ।

अथ परदिने अन्ये श्रीपादाः तत्पुस्तकं याचितवन्तः । तान् प्रति रघुवर्यस्वामिन ऊचुः— अस्माभिः प्रदर्शितो ग्रन्थः न श्रीमदाचार्यप्रणीतः किन्तु अस्माभिरेव परेषां पराभवाय कृतः । इदानीं तु श्रीमदाचार्यकृतेः प्रतिनिधिर्न स्थापनीयः अनर्थहेतुत्वादिति नाशितः । तत् श्रुत्वा सर्वेऽपि साधुकृतमित्युक्त्वा तेषां पूजां कृत्वा गतवन्त इति ।

अत एव भीमसेनोऽपि लक्षणास्वयंवरे लक्ष्यदर्शनमपि नैच्छत् । तदुक्तम्—

> भीमश्चायं लक्ष्यमप्येतदत्र
> द्रष्टुं च नैवेच्छदरीन्द्रधारिणः ।
> योग्ये कर्मण्यायतंश्चापराधी
> स्यामित्यज्ञः पश्यमानो महात्मा ॥

वेदनिधिस्वामिप्रभृतीनां सत्यानन्दतीर्थानां द्रोहस्तु सर्वानुभवसिद्धत्वात् न व्युत्पादनमपेक्षते । अतोऽसौ सद्भिर्दण्ड्यो निन्द्यश्च ।

"यः प्रशंस्यात् न प्रशंसेन्न निन्द्यो येन निन्द्यते ।
ताबुभौ नरकं यातो यावदाभूतसम्प्लवम् ॥"

इति एकादशतात्पर्योक्तेः । टिप्पणद्वारा सुधार्थविभ्रमहेतुत्वात् जगद्धन्ता चेति ।

तथाहि— "कर्मकर्त्रोरुत्सर्गतोऽभिधे"ति मूलसुधायां नेति पक्षेऽनुभवविरोधः । जानातेः सदा सकर्मकत्वावभासाच्चेति वाक्यद्वयमस्ति । तत्कश्चिद्व्याख्यातवान् ।

तथाहि— घटादिवद्विषयानुल्लेखितया ज्ञानस्याननुभवात् तस्याकर्मकत्वमप्रामाणिकमित्यर्थः । न केवलं विषयानुल्लेखितया नानुभूयतयैव । किन्तु विषयोल्लेखितयैवानुभूयमानत्वाच्चेत्याह **जानातेरिति** । जानातेः सकर्मकत्वावभासेन सविषयकत्वस्य ज्ञानस्वभावत्वस्थितेर्निर्विषयत्वे तत्स्वभावशून्यतया घटादिवत् ज्ञानत्वं न स्यात् इति । स स्थूलदृश्वा अहमिति अनुभवस्य सकर्मकतया अनुभूयमानत्वेन अनुभव-

विरोध इत्यर्थमपहाय विषयानुल्लेखितया ज्ञानस्याननुभवादिति व्याख्यातत्वात् । बाधाभावेन मुख्यार्थत्यागायोगात् । जानातेः सकर्मकत्वादिति निदेशस्य धातुनिर्देशत्वेन ज्ञानपूर्वत्वेन व्याख्यानस्य अज्ञानमूलत्वात् । धातोः सकर्मकत्वेन तदर्थज्ञानस्य सकर्मकत्वसाधनस्य इहाभिमतत्वात् ॥

अन्तर उपपत्तेः ॥ "अन्तःस्थित्वा रमणकृत् अन्तरः समुदाहृत" इति मूलसुधायां अन्तःशब्दोपपदात् रमतेः यमन्तात् ड इति डः । उणादयो बहुलमित्युपपदलोप इति वाक्यद्वयं कश्चिद्व्याख्याति । कथमेतावतोऽर्थस्यान्तर इत्येतस्माल्लाभ इत्यतः प्रकृतिप्रत्ययविभागप्रदर्शिना भाष्यकारीयं व्याख्यानमुपपादयति **अशब्दोपपदादिति** ।

यमन्ताड्ड इति ड इति । अत्र ञमिति प्रत्याहारग्रहणम् । ञमङणनमिति । ञमन्ताद्धातोर्डप्रत्ययो भवतीत्यर्थः । ततश्च मान्ततया ञमन्ताद् रमेः कर्तरि डप्रत्यये चुट् इति उकारस्य

इत्संज्ञायां डित्वविधिसामर्थ्याद् अमस्यापि रमेष्टिलोपे र इति रूपनिष्पत्तिरिति भावः । न चैवं दम् उपशमे इत्यस्माद् दम्यन्तेऽनेनोद्धता जना इति करणे डप्रत्यये डस्य इत्संज्ञायां टिलोपे च द इत्येव स्यात् न तु वंउ इतीति वाच्यम् । चुटुषः प्रत्ययस्येत्यत्र टुटुषाः प्रत्ययस्येत्येकयोगे कर्तव्ये पृथक्योग-करणमस्यानित्यत्वज्ञापनार्थमित्याकरे स्थितत्वेन चुटू इत्य-स्यानित्यत्वाद्वा प्रत्ययाद्यतिरिक्तस्य कस्मैचित्कार्यायोच्चार्य-माणस्यैव वर्णस्य इत्संज्ञाया आकरे स्थित्या प्रयोजनाभावात् बाहुलकाद्वा लुशविधाविव लुप्तयकारप्रत्ययादित्वाद्वा डस्ये-त्संज्ञाभावसिद्ध्या दण्डो वण्ड इत्यादिरूपसिद्ध्युपपत्तेरप्रत्यूह-त्वात् ।

नन्वेवमपि रोरीत्युपपदान्तरे फलेऽपि ढ्रलोपे पूर्वस्य दीर्घोऽण इति दीर्घतायां च सत्यां पुना रमत इत्यादिवदन्तार इति भवितव्यम् । अन्तर इति तु कथमित्यतः स्यादेतदेवं यद्यत्र रो रीति रेफनिमित्तको रेफलोपोऽभिमतः स्यात् । न चैवं किं नाम

बाहुलकनिमित्त एव । तथाच रेफलोपनिमित्तकस्य रेफस्य परत्वाभावात् न दीर्घत्वप्रसङ्ग इत्याह **उणादय इति** । उप-पदलोप इत्यलोऽन्त्यपरिभाषयोपपदान्त्यरेफलोप इत्यर्थः । क्वचित्प्रवृत्तिः क्वचिदप्रवृत्तिः । क्वचिद्विभाषा क्वचिदन्यदेवाविधे-र्विधानं बहुधा समीक्ष्य चतुर्विधं बाहुलकं वदन्तीत्यभियुक्ते बाहुलकग्रहणादपेक्षिताशेषार्थसिद्धिरिति ध्येयम् इति । तदतीव मन्दम् ।

सुधायां हि अन्तःशब्दोपपदादित्युक्तं तदयुक्तमिवाभाति । तत्रोपपदं सप्तमीस्थमित्युक्तत्वेन ञमन्ताड्ड इति सूत्रे सप्तमी-निर्देशाभावेनान्तःशब्दस्योपपदत्वायोगात् । डप्रत्ययस्योपपद-सापेक्षत्वे दण्डो दण्ड इत्यादिरूपसिद्धिश्च न स्यात् । ततो-ऽवश्यं व्याख्येयस्य अन्तःशब्दोपपदादित्यस्याव्याख्यानात् । यदपि डित्वविधिसामर्थ्यादिति । तदपि न । डित्वविधेरभावे न डिद्विधिसामर्थ्यादिति वक्तव्यत्वात् । यदपि प्रत्ययाद्यतिरिक्तस्य कस्मैचित्कार्यायोच्चार्यमाणस्यैव वर्णस्येत्संज्ञाया आकरे स्थित्या

प्रयोजनाभावादिति समाधानं तदतीव मन्दम् । डप्रत्यस्य प्रत्ययान्तर्गतत्वेन दण्ड इत्यादावलोपे प्रकृतेऽप्यलोपप्रसङ्गात् । यदपि लुप्तयकारप्रत्यययादित्वाद्वेति तदपि एवमेव । प्रकृतेऽपि लुप्तयकारादित्वे डलोपायोगात् । रो रीत्युपपदान्त्यलोप इत्यप्ययुक्तम् । अस्योपपदत्वाभावात् सुधायां उक्तत्वेन मयाऽप्युक्तमिति चेत् । सुधाभिप्रायमबुद्ध्वा शुकबालादिवत् अनुकरणमात्रायोगात् । यदपि नात्र रो रीति लोपो विवक्षितः । किन्तु उणादयो बहुलमिति लोपो विवक्षित इति समाधानाशयवर्णनम् । तदपि न । रो रीति प्राप्तेरवर्जनीयत्वात् । सौत्रत्वान्निर्देशस्य प्राप्तापि रो रीति प्राप्तिः नाश्रियते इति चेत् । हन्त तर्हि रो रीति लोपमङ्गीकृत्य दीर्घाभाव एवाङ्गीकरणीयः । उणादयो बहुलमित्यनेन प्रत्ययानामेव बाहुलिकत्वाभिधानेन तेन पदान्तरसम्बन्धिवर्णलोपायोगात् ।

यदपि अलोन्त्यपरिभाषया उपपदान्त्यरेफलोप इत्यर्थ इति । तन्न । सूत्रे षष्ठीनिदेशाभावेनालोन्त्यपरिभाषाप्रसक्ते-

रभावात् । एतद्वाक्यद्वयव्याख्यानं तु अस्मत्कृतसुधाटिप्पण्यां द्रष्टव्यम् ।

अदृश्यत्वादिगुणको धर्मोक्तेः ॥ "नाभावो भाव इति च विशेषः प्रायशो भवेत्" इति मूलसुधायां धर्मित्वं च भूतलादेः प्रातीतिकं न वस्तुकृतमिति वाक्यं कश्चिद् व्याख्याति । नन्वेवं प्रागभावादेर्धर्मिणोऽत्यन्तभेदे भूतलादेस्तन्निरूपितधर्मित्वं न स्यात् । धर्मित्वस्य धर्मतादात्म्यनिबन्धनत्वादित्यतो वास्तवधर्मित्वस्य धर्मतादात्म्यनिबन्धनेऽपि प्रातीतिकस्य तदभावात् भूतलादेः प्रागभावादिकं प्रति प्रातीतिकस्यैव धर्मित्वस्याङ्गीकारात् नानुपपत्तिरित्याह **धर्मित्वं चेति** । प्रातीतिकं प्रतीत्यैव केवलं विषयीक्रियते न वस्तुगत्याऽस्तीत्यर्थः । न चैवं घटाभाववद्भूतलमित्यादिप्रतीतीनां भ्रमत्वापत्तिः । तत्र ह्यभावो विशेषणमात्रं तद्वत्त्वमेव धर्म इति वक्ष्यमाणन्यायेन भूतलादौ तद्वत्त्वनिरूपितमेव धर्मित्वं वास्तवं नाभावनिरूपितमित्यङ्गीकारात् इति । तत्तुच्छम् ।

धर्मित्वस्य धर्मतादात्म्यनिबन्धनत्वादिति पूर्वपक्षिणा स्वरीत्योच्यते उत सिद्धान्तिरीत्या। नाद्यः। परमते भिन्नयोरेव धर्मधर्मिभावाङ्गीकारात्। नापि द्वितीयः। सिद्धान्तिमतेऽपि धर्मधर्मिभावस्य भेदकार्यत्वात्। कथमन्यथा धर्मधर्मिभावोपपत्तये भेदप्रतिनिधिं विशेषमुपादद्यात्। कथञ्चिच्छङ्कायामपि वास्तवधर्मित्वस्य धर्मतादात्म्यनिबन्धनत्वेऽपीति सुधाभिप्रायवर्णनमयुक्तम्। धर्मित्वस्य तादात्म्यनिबन्धनत्वाभावात्। भूतलनिष्ठस्य प्रागभावधर्मित्वस्य वास्तवत्वाच्च। भूतलादेः प्रावादिकं प्रति प्रातीतिकस्यैव धर्मित्वस्याङ्गीकारादित्यप्यज्ञानमूलम्। सिद्धान्तिमते अभावधर्मित्वस्य पारमार्थिकत्वेन प्रातिभासिकत्वाभावात्। प्रातीतिकं प्रतीत्यैव केवलं विषयीक्रियते न वस्तुगत्याऽस्तीत्यर्थ इत्यप्ययुक्तम्। अविद्यमानार्थविषयकत्वेन प्रतीतेर्भ्रमत्वप्रसङ्गात्। यदपि प्रतीतेर्भ्रमत्वमाशङ्क्य समाहितं तदपि न। अभावनिरूपितधर्मित्वाभावे अभाववद् भूतलमिति प्रतीतेः भ्रमत्वापरिहारात्। न हि अभाववत्वं भूतले

अस्तीत्येतावता अभावाभावेऽपि भूतले अभावोऽस्तीति प्रतीतिः प्रमेति शक्यते वक्तुम्। अतिप्रसङ्गात्। नास्ति भूतलेऽभावः अभावत्वं चास्तीतीत्यस्य व्याहतत्वाच्च। एतद्वाक्यं त्वामेव पृच्छामीति चेत् शृणु।

ननु भूतलविनाशे घटाभावोऽनुवर्तत इत्ययुक्तम्। धर्म्यभावे धर्मायोगादित्यत आह **धर्मित्वं च भूतलादेरिति**। भूतलादेर्धर्मित्वं प्रातीतिकं प्रमाणसिद्धं न वस्तुकृतम्। अभावस्य धर्म्यपेक्षाप्रयुक्तं नेत्यर्थः।

इदमुक्तं भवति— द्विविधा धर्माः धर्मिसत्तासापेक्षाः निरपेक्षाश्चेति रूपादयो धर्माः धर्मिसत्तासापेक्षाः तदधिकरणानां घटादीनां धर्मित्वं रूपावस्थानानुपपत्तिकृतं तदेव वस्तुकृतमित्युच्यते। प्रतियोगित्वादयस्तु धर्मिसत्तानिरपेक्षाः तदधिकरणानामधिकरणत्वं तु आबाधितप्रतीतिसिद्धम्। अत एव प्रातीतिकमुच्यते न तु प्रातिभासिकत्वात्। एवंच धर्म्यभावेऽपि अभावसत्त्वं नानुपपन्नम्। तद्यथाधीनत्वान्यथानुपपत्तिकल्पि-

तस्य रात्रिभोजनस्याभाव एव पीनत्वमनुपपन्नं भवति । न पुनः दिवाऽभुञ्जानस्य अनुभवसिद्धरात्रिभोजनस्य व्रतधारणादिवशात् रात्रिभोजनपरित्यागे पीनत्वमनुपपन्नं भवति ॥

॥ इति श्रीमत्सत्यनिधितीर्थश्रीचरणचरणाराधकसत्यनाथविरचिते गुरुद्रोहिखण्डने प्रथमाध्यायस्य द्वितीयः पादः ॥

★★★

अधिकारश्च तद्धानिः प्रसङ्गादेव चिन्तिताविति मूलसुधायां ननु चिन्तिताविति कथम् । विप्रतिषेधे परं कार्यमिति स्त्रीलिङ्गे .... त्यध्याहारात् इति वाक्यानि सन्ति । तानि कश्चिद् व्याख्याति । .... पुल्लिङ्गं कथमित्यर्थः । ननु चात्र का कथन्ता । ब्राह्मणश्च ब्राह्म .... चिन्तिता च चिन्तितावित्यत्र पुंसः शेषेण तल्लिङ्गोपपत्तेः .... तल्लक्षण-श्चेदेव विशेष इत्यनुवर्तते । तत्र च तल्लक्षणश्चे............... .... लिङ्गकृतं यत्र वैरूप्यमित्यर्थप्रतिपादनेन कुक्कुटमयूर्या................................... क्षण्ये एकशेष-निषेधात् । एवेत्यनेन तु विशेष्यकृतवैल..................... .... अधिकारतद्धानिरूपविशेष्यकृतवैलक्षण्यात् .... षो न सम्भवतीति वाच्यम् । तत्र एवकारेण इन्द्रश्च इन्द्राणी च .... निषेधार्थं स्त्रीपुंसविशेष्यवैलक्षण्यातिरिक्तप्रत्ययाग..............

.... त्वेन प्रकृतविशेष्यकृतवैलक्षण्ये सत्यपि आगमादिवैल.................................... प्रकृते एकशेषसम्भवात् । तत्कथं पुल्लिङ्गानुपपत्तिरित्यतोऽत्र चि .... इत्याद्येकवचनान्तेन अन्वयानुपपत्त्या तदुपपत्त्यर्थं अधिकारश्च .... कार-तद्धानीत्येवंरूपस्य विरुद्धानेकलिङ्गावयवद्वन्द्वरूपद्विवचनान्त- .... द्विशेषणे चिन्तितावित्यस्मिं-शब्दे उक्तरीत्या पुमान् स्त्रियेत्यनेन एक .... लिङ्गानां विशेषणानां विशेष्यनिघ्नतया तल्लिङ्गत्वनियमात् .... विशेष्यानुरोधेन अनेकलिङ्गतापत्तौ युगपत् अनेकलिङ्गत्वा............................... नेकलिङ्गा-वयवद्वन्द्वानुप्रयोगे परवल्लिङ्गं द्वन्द्वतत्पुरुषयो .... कुक्कुटमयूर्यावित्येतदनुप्रयोगे अयं च इयं च इम इत्यादौ इदम् .... पदलिङ्गस्यैव प्राप्त्या चिन्तितेति स्त्रीलिङ्गस्यैव भाव्यत्वादित्यभि................. ....

.... लिङ्गद्वयप्राप्तावित्यर्थः । परं कार्यमितीत्यनेन परवल्लिङ्गं द्वन्द्वतत्पुरु.................................. गृह्णाति ।

चिन्तिताविति द्विवचनान्तस्य अधिकार इत्याद्येकवचने-नान्वयानुपपत्त्या तदन्वययोग्यपदान्तरस्याध्याहर्तव्यत्वेऽपि इमौ विषयावित्यादिपदान्तराध्याहारस्याकर्तव्यत्वात् न लिङ्गानुप-पत्तिरिति समाधत्ते **मैवमिति** । अधिकारतद्धान्योरेव विषयता-प्रतिपत्तये इतीमावित्युक्तम् । विषयाविति विधेयलिङ्गापेक्षया इमाविति पुल्लिङ्गमिति दर्शयितुं विषयावित्युक्तम् ।

अयमाशयः— चिन्तितावित्येतत् नाधिकारश्च तद्धानि-रित्यनेन श्रुतेनान्वेति । यनभिन्नवचनतया विशेषणविशेष्य-भावानुपपत्तिः स्यात् । किन्तु इमौ विषयावित्यध्याहृतेनैव । तथाच विषयश्च विषयश्च विषयौ । चिन्तितश्च चिन्तितश्च चिन्तितावित्यत्रोभयोरपि पुल्लिङ्गप्रयोगोपपत्तिरिति । तत्तुच्छम् । तथाहि । यत्तावदुक्तं प्रकृते विशेष्यकृतवैलक्षण्ये सत्यपीति

तावदयुक्तम् । चिन्तचिन्तिताशब्दयोः स्त्रीपुंसस्त्वव्यतिरिक्त-विशेष्यकृतवैलक्षण्यादर्शनात् ।

यदपि चिन्तिताविति द्विवचनान्तस्य अधिकार इत्याद्येक-वचनान्तेनान्वयानुपपत्त्येति । तदसत् । द्विवचनान्तस्यापि एकवचनेनान्वयसम्भवात् । यथोक्तं महाभाष्ये— युष्मदस्मदो-रनेकशेषभावेऽपि तदधिकरणानामेकशेषो दृश्यते । तद्यथा 'त्वं चाहं च वृत्रहन् सम्प्रयुज्यावहायिति ॥ २ ॥

अस्तु वा द्विवचनान्तस्य एकवचनेनान्वयानुपपत्तिः । तथापि यदुच्यते । अधिकारश्च तद्धानिरिति मूलग्रन्थानुरोधेन अधिकारतद्धानीत्येवंरूपस्य विरुद्धानेकलिङ्गावयवद्वन्द्वरूपद्विव-चनान्तविशेष्यपदस्याध्याहर्तव्यत्वादिति । तदतीव मन्दम् । तथा सति अधिकारश्च तद्धानिरिति श्रूयमाणयोः पदयोरन्वयाभावेन वैयर्थ्यप्रसङ्गात् ॥ ३ ॥

किञ्च चिन्तितावित्यस्यान्वयानुपपत्त्या यदि विशेष्या-ध्याहारोऽभिमतः तथापि अधिकारतद्धानीत्यध्याहारो न युक्तः । अध्याह्रियमाणस्य स्त्रीलिङ्गत्वमिति सम्भवति । कल्पना-वैयर्थ्यात् ॥ ४ ॥

यदपि विरुद्धानेकलिङ्गावयवद्वन्द्वरूपविशेष्यानुरोधेन अनेकलिङ्गतापत्ताविति । तदसत् । विशेष्यस्य एकलिङ्गत्वेन तदनुरोधेन चिन्तितावित्यत्र अनेकलिङ्गप्राप्त्यभिधानायोगात् ॥ ५ ॥

यदपि युगपत् अनेकलिङ्गत्वानुपपत्तेः पर्यायेण तत्प्रसङ्ग इति । तदप्यसत् । युगपत् अनेकलिङ्गप्रसक्तेन भावेन युगपत् तदनुपपत्तिमुद्भाव्य पर्यायेण तत्प्रसङ्गायोगात् ॥ ६ ॥

यदपि विरुद्धानेकलिङ्गावयवद्वन्द्वानुप्रयोगे परवल्लिङ्गं द्वन्द्व-तत्पुरुषयोरिति परवल्लिङ्गानुशासनादिति । तदज्ञानमूलकम् । अस्य सूत्रस्य द्वन्द्वतत्पुरुषयोरेव परवल्लिङ्गानुशासनरूपत्वेन अनुप्रयोगे तदननुशासनत्वात् ॥ ७ ॥

यदपि कुक्कुटमयूर्यावित्येतदनुप्रयोगे अयं इयं च इम इत्यादौ इदंशब्दे मयूरीपदलिङ्गवत् तद्धानिपदलिङ्गस्यैव प्राप्त्या चिन्तितेति स्त्रीलिङ्गस्यैव भाव्यत्वादिति। तदप्ययुक्तम्। अयं च इयं च इमे इत्यस्य कुक्कुटमयूरीपदलिङ्गत्वेन मयूरीपदलिङ्गत्वाभावात्। इमे इत्यस्य कुक्कुटमयूरीपदानुप्रयोगत्वेन मयूरीपदानुप्रयोगत्वाभावात् लिङ्गत्वं वदन् श्लाघनीयप्रज्ञः ॥ ८ ॥

तथा अधिकारतद्धानीत्यस्य स्वेनैवाध्याहृतत्वेन तल्लिङ्गत्वं स्यादिति वक्तव्ये तद्विहाय तद्धानिपदलिङ्गस्यैव प्राप्त्येतिवचनमप्यसाधु । चिन्तितामित्यस्य तद्धानिपदविशेषणत्वाभावात् ॥ ९ ॥

यदपि विरुद्धलिङ्गद्वयप्राप्तावित्यर्थ इति । तदपि न । अधिकारतद्धानीति विशेष्यस्याध्याहृतत्वेन विरुद्धलिङ्गद्वयप्राप्त्यभावात् ॥ १० ॥

अविरुद्धलिङ्गद्वयाभावात् व्यावृत्त्या भावेन विरुद्धाविशेषणवैयर्थ्याच्च ॥ ११ ॥

यदपि परं कार्यमितीत्यनेन परवल्लिङ्गं द्वन्द्वतत्पुरुषयोरित्येतत्सूत्रं तात्पर्यतः सङ्गृह्णातीति । तत्तुच्छम् । चिन्तितावित्यस्य एकपदत्वेन समासत्वाभावेन परवल्लिङ्गमिति सूत्रप्रसक्त्यभावात् ॥ १२ ॥

यदपि इमौ विषयावित्यादिपदान्तराध्याहारेणापि तदन्वयोपपत्ताविति। तन्न। अधिकारतद्धानीतिपदाध्याहारे विरुद्धलिङ्गत्वेनान्वयासम्भवेन समुच्चायकापिशब्दवैयर्थ्यात् ॥ १३ ॥

समाधानग्रन्थे अध्याहारान्तराभावेन आदिशब्दवैयर्थ्याच्च यदपि विषयाविति विधेयलिङ्गापेक्षया इमाविति पुल्लिङ्गमिति दर्शयितुं विषयावित्युक्तमिति । तदपि न । विधेयमनपेक्ष्य अपि चिन्तितावित्युपपत्तये इमाविति पुल्लिङ्गाध्याहारसम्भवात् ॥ १४ ॥

सुधावाक्यार्थस्तु अस्मदीयटिप्पण्यां द्रष्टव्यः। ग्रन्थगौरव-भिया नेहोक्तः । अस्माभिस्तु एतावन्त्येव दूषणान्युक्तानीति तावन्त्येवेति न मन्तव्यम्। दूषणानामनन्तत्वेन वक्तुमशक्यत्वात् उपरम्यते। एवमन्यत्रापि द्रष्टव्यम्।

॥ इति श्रीमत्सत्यनिधितीर्थश्रीचरणचरणाराधकसत्यनाथयतिविरचिते गुरुद्रोहिखण्डने प्रथमाध्यायस्य तृतीयः पादः ॥

★★★

॥ ॐ ज्योतिरुपक्रमात्तु तथा ह्यधीयत एके ॐ ॥

वौषडित्येव कथ्यत इति मूलसुधायां तर्हि कथ्यत इति कथं भावेप्रयोगो न कर्मणीत्यदोष इति वाक्यद्वयं कश्चि-द्व्याख्याति । कथ्यत इत्यस्य कर्मणि निष्पन्नतया विष्णौ वर्तमानषट्शब्दोक्तगुणानामेव कथनक्रियां प्रति कर्मत्वेन तेषां च बहुत्वात् भाष्ये कथ्यन्त इति बहुवचनेन भवितव्यम्। कथ्यत इत्येकवचनं तु कथमित्याक्षिपति **न हीति** । भावे कथ्यत इत्यस्य निष्पन्नत्वात् भावस्यैकत्वात् एकवचनं युक्तयुक्तमिति परिहरति **भाव इति**। तथाच विष्णौ वर्तमाना गुणा इति कथ्यत इति कथनमिति योजनोक्ता भवतीति। स स्थूलदृश्वा। कथधातोः सकर्मकत्वेन सकर्मकेभ्यः धातुभ्यः कर्मणि कर्तरि च लकारस्योत्पत्तव्यत्वेन भावे लकारायोगात्। यथाह पाणिनिः । लः कर्मणि च भावे चाकर्मकेभ्य इति ।

काशिकायां च सकर्मकेभ्यो भावेन भवतीत्यभिधानात् । एवं तर्हि त्वामेव पृच्छामीति चेत् शृणु । तर्हि कथ्यत इति कथमिति । कर्मणां बहुत्वात् कथ्यन्त इति बहुवचनेन भाव्यमिति भावः । **भावेप्रयोग इति** । कथ्यत इति प्रयोगः भावे कर्मणि न । किन्तु भवितृकर्मणि तस्यैकत्वात् अदोष इत्यर्थः ।

इदमुक्तं भवति— अत्र द्वे कर्मणि गुणाः हरिश्च । तत्रायं प्रयोगो न गुणविवक्षया । येन बहुवचनप्रसङ्गः । अपि तु हरिविवक्षया तस्य तु एकत्वादेवावचनमुपपन्नमिति । "प्रयोगयुक्तसादृश्यं सम्बन्धो वाप्यमुख्यतः । वृत्तिहेतुरिति ज्ञेय" इति मूलसुधायां केचिदविनाभूतार्थप्रतीतिर्लक्षणोच्यत इत्याहुः । तेषां मञ्चाः क्रोशन्तीत्यादौ लक्षणा न स्यात् । स्याच्च शब्दात् प्रतीतेन लिङ्गेन अमितार्थस्येति वाक्यानि सन्ति । तत्र स्याच्चेति वाक्यं कश्चिद्व्याख्याति **स्याच्चेति** । तथाच धूमोऽस्तीतिवाक्यबुद्धधूमजन्यवह्न्यनुमितौ तद्धेतुव्यापारे चातिव्याप्तिरिति भाव इति । तदसत् । शब्देन यदा अभिधेयाविनाभूतार्थप्रतीतिः

तदा तस्य शब्दस्य लक्षणेति परेषामाशयः । न च वह्न्यनुमितिः शब्दजन्या लिङ्गजन्यत्वस्य त्वयैवाभिधानेन अतिव्याप्त्यभिधानायोगात् ।

बाह्यावयवगौरवादिति मूलसुधायाम् । अस्तु वा उपादाने पञ्चमी । तथापि पञ्चमीबलादुपादानत्वनिश्चयो नोपपद्यते । अनेकार्थत्वात् । विशेषस्मरणादित्युक्तमिति चेत् । किमिदं विशेषस्मरणम् । जनिधातुग्रहणेनेति चेत् । तर्ह्यात्मन आकाशः सम्भूत इत्यादीमनुदाहरणीयत्वं स्यात् इति वाक्यानि सन्ति । तानि कश्चिद् व्याचष्टे **अनेकार्थत्वादिति** । जाड्याद्बाधः पुण्यात्सुखमित्यादाविव यत इत्यादि पञ्चम्याः निमित्तार्थकत्वस्यापादानार्थकत्वेऽपि वृक्षात्पततीत्यादाविव विश्लेषावधिमात्रार्थत्वस्य सम्भवे ....

★ ★ ★

Printed at :

Pragati Graphics

Katriguppe Main Road

Bangalore